National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
**NJHSR 2025;** 1(61): 163-165
© 2025 NJHSR
www.sanskritarticle.com

**श्रीजेष् टि**
अनुसन्धाता (ज्योतिषविभागः),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

**Correspondence:**
**श्रीजेष् टि**
अनुसन्धाता (ज्योतिषविभागः),
राष्ट्रियसंस्कृतविश्वविद्यालयः,
तिरुपतिः

# भारतीयज्योतिषशास्त्रानुगुणं मानवजीवने छायाग्रहाणां प्रभावः

**श्रीजेष् टि**

**शोधसारः**

ज्योतिषशास्त्रानुसारं ग्रहेषु मुख्यतया नवग्रहाणां विचारः क्रियते। नवग्रहेषु सूर्यचन्द्रौ प्रकाशकौ ग्रहौ। कुजः, बुधः, गुरुः, शुक्रः, शनिः चताराग्रहाः। एते च पञ्चग्रहाः स्वयं प्रकाशन्ते प्रकाशं ददति च। राहुः केतुश्च तमो ग्रहौ इति उच्यते यतः तेषां द्रव्यमानं न प्रकाशः इत्यतः। अत एव छायारूपत्वात् छायाग्रह इत्युच्यते। मानवजीवने एतौ द्वौ अपि प्रभावयतः। राहुकेतवयोः मानवजीवनस्योपरि प्रभावः कीदृशो भवतीति पत्रेऽस्मिन् प्रस्तूयते।

**कूटशब्दाः –** ज्योतिषशास्त्रम्, नवग्रहाः, छायाग्रहः, नक्षत्राणि।

**उपोद्घातः**

ज्योतिषस्य मौलिकतत्त्वेषु नक्षत्राणां ग्रहाणां च प्रमुखं स्थानम् वर्तते। ग्रहाः नक्षत्राणि च ज्योतिषशास्त्रस्य मुख्याधाराः सन्ति। कस्यापि समस्यायाः समाधानाय, शुभ-अशुभघटनानां वर्णनाय, शुभाशुभकार्यकालाद्यनुमानाय, पञ्चाङ्गनिर्माणाय, मासदिनादीनां गणनादिसर्वविधविषयाणां कृते ग्रहनक्षत्राणां महत्त्वं भवति। ये सूर्यादिग्रहाः आकाशे दृश्यन्ते ते गतिशीलाः वर्तन्ते। तस्मात् कारणात् ज्योतिषव्यवस्था अपि गतिशीला एव भवति। अस्मिन् सौरमण्डले नक्षत्रग्रहाः व्यवस्थिताः भवन्ति। ज्योतिषशास्त्रस्य सम्पूर्णा गणना एतयोः मुख्यतत्त्वयोः आधारेण भवति। अतः ज्योतिषजगत् मुख्यतया नक्षत्रम्, ग्रहेत्येवं भागद्वयेन विभक्तं वर्तते। नवग्रहेषु छायाग्रहौ प्रसिद्धौ। मानवजीवने एतौ अपि प्रभावयतः।

**ग्रहेषु छायाग्रहत्वम्**

सूर्यस्य कस्यापि प्रकाशस्य वा मध्ये अन्यस्य वस्तुनः उपस्थित्या सापेक्षिकं तमः छाया उच्यते। यस्मात् वस्तुनः विरहात् प्रकाशः अन्तर्धानं भवति तत् स्थानं छाया इत्युच्यते। भूमौ वा अन्येन पृष्ठभागेन वा विच्छिन्नसमये या बिम्बोऽस्याः छायाम् उत्पद्यते, सा तस्य वस्तुनः छाया इति उच्यते। छाया न सर्वदा वस्तुनः समाना भवति। प्रकाशयुक्तस्य द्रव्यस्य परिमाणस्य दूरस्य च भेदात् वा तस्य आकारः भिन्नतया दृश्यते। वैदिकज्योतिषे नवग्रहाः सन्ति। तेषु सप्तग्रहाः भौतिकरूपेण वर्तन्ते। किन्तु ज्योतिषशास्त्रानुसारेण राहुः केतुः च तादृशौ ग्रहौ स्तः यस्य भौतिकरूपं नास्ति इति। राहुः केतुश्च सामान्यतः अशुभौ पापौ च वर्तेते। एतौ चन्द्रस्य पृथिव्याः च प्रतिच्छेदबिन्दवौ स्तः। अत एव तौ अदृश्यग्रहौ इति ज्ञेयः। पौराणिककथानामनुसारम् एतौ ग्रहौ सूर्यचन्द्रौ मिलित्वा ग्रहणं कुर्वतः इति। एतौ ग्रहौ सर्वदा परस्परं १८० अंशे दूरे भवतः। यदा सूर्यचन्द्रौ राहुकेतवयोः समीपे भवति तदा सूर्यग्रहणं चन्द्रग्रहणं वा भवति इति प्रमाणम्। राहुः केतुश्च प्रख्यातौ पापग्रहौ स्तः।

वैदिकज्योतिषशास्त्रानुसारेण राहुः भ्रान्तिः, भयं, वञ्चना, अज्ञातरोगाः चेत्यादि फलानि प्रददाति। राहुः पुरुषे अधिकतया लौकिकतां भौतिकचिन्तनं च सृजयति। तस्य प्रभावात् लौकिककान्तिमोहेषु प्रवृत्तः एव भवति मानवः। एतत् चिन्तनं मानवस्य आकस्मिकं यशः, लोभं, कूटनीतिं च प्रददाति। स्वभावतः रोगस्य,

अपराधिनां, तस्कराणां च कारणग्रहः राहुः इति विश्वासः। यदा राहुः जन्मपत्रिकायां बलवान् भवति तदा शक्तिं, राजनीतिम्, उच्चस्थानं च प्रददाति। जन्मपत्रिकायां राहोः स्थानं कदाचित् अनुचितकार्यात् उत्थानस्य शक्तिं ददाति। राहुः चोरकारागारसर्पविषविदेशयात्राणां कारणग्रहः इति। राहुग्रहस्य अशुभप्रभावात् व्यक्तिः अशुभदिशायां गच्छति। अथवा स्वजीवने अशुभं पदं स्वीकुर्यात् येन तस्य जातकस्य अधिकः व्ययः भवितुमर्हति। परन्तु कुण्डल्यां राहुग्रहस्य शुभस्थानस्य कारणात् आकस्मिकसमृद्धिः, यशः, सफलता, आकस्मिकधनप्राप्तिः च प्राप्नोति। राहुः लौकिककामपूर्तये प्रसिद्धः।

**लग्नेऽहावचिरायुरर्थबलावानूर्ध्वङ्गरोगान्वित-**
**श्छन्नोक्तिर्मुखरुग्घृणी नृपधनी वित्ते सरोषः सुखी।**
**मानी भ्रातृविरोधको दृढमतिः शौर्ये चिरायुर्धनी**
**मूर्खी वेश्मनि दुःखकृत्ससुहृदल्पायुः कदाचित्सुखी॥**[1] २५॥

श्लोकेन अनेन राहुग्रहस्य गुणदोषसमन्वितानि फलानि प्रतिपादयन्ति। यदि राहुः लग्ने भवति तर्हि जातकः अल्पायुः, धनिकः, प्रबलः, शिरोरोगी च भवति। यदि द्वितीये गृहे तर्हि गुप्तभाषी, दुर्मुखः, व्रणितः, राजधनयुक्तः, क्रुद्धः, प्रसन्नः इत्यादीनि फलानि भवन्ति। यदि तृतीये गृहे तर्हि अभिमानी, भ्रातृविरोधी, दृढबुद्धिः, दीर्घायुषी, धनिकः चेति फलानि। यदि चतुर्थे गृहे राहुः अस्ति तर्हि अज्ञानी, दुःखी, मित्रैः सह भीरुः, अल्पायुषी, कदाचित् सुखी च भविष्यति।

**नासोद्यद्वचनोऽसुतः कठिनहृद्राहौ सुते कुक्षिरु-**
**ग्विड्करग्रहपीडितः सगुदरुपन्छीमांश्चिरायुः क्षते।**
**स्त्रीसंगादधनो मदेऽथ विधुरोऽवीर्यः स्वतन्त्रोऽल्पधी-**
**रन्ध्रेऽल्पायुरशुद्धिकृच्च विकलो वातामयोऽल्पात्मजः॥**[2] २६॥

यदि राहुः पञ्चमे गृहे भवति तर्हि सः रोगी, मत्तः, पुत्रहीनः, कठोरहृदयः, युद्धप्रियः च भवति। यदि ६ गृहे तर्हि दुष्टग्रहपीडितः, अस्वस्थः, ऐश्वर्यवान्, दीर्घायुषी च भवति। यदि ७ गृहे तर्हि स्त्रीसङ्गात् धनविहीनः, मनोव्यथयुक्तः, वीर्यहीनः, स्वतन्त्रः, अल्पबुद्धिः च भवति। एवं अष्टमे गृहे तर्हि सः अल्पायुः, अपाङ्गः, वातरोगी, पुत्रहीनः च भवति।

**धर्मस्थे प्रतिकूलवाग्गणपुरग्रामाधिपोऽपुण्यवान्**
**ख्यातः खेऽल्पसुतोऽन्यकार्यनिरतः सत्कर्महीनोऽभयः।**
**श्रीमान्नातिसुतश्चिरायुरसुरे लभे सकर्णामयः**
**प्रच्छन्नाघरतो बहुव्ययकरो रिः फेऽम्बुरुक्पीडितः॥**[3] २७॥

यदि राहुः ९ गृहे भवति यः विपरीतवचनयुक्तः भवति। एवं समूह-गृह-ग्रामादीनां स्वामी, अपुण्यवान् परन्तु कीर्तिमान् च भवति। १० गृहे चेत् न्यूनाः पुत्राः, परकार्येषु रुचिः, सत्कर्मविरोधी, निर्भयवान् च भवति। राहुः ११ भावे चेत् ऐश्वर्यवान्, न्यूनपुत्रसहितः, दीर्घायुष्मान्, बधिरः च भवति। यदि द्वादशगृहे राहुः चेत् पापं गोपयन्, अतिव्ययी, जलरोगेण पीडितः च भविष्यति।

एवं च केतुः मानवस्य आध्यात्मिकतृष्णां शामयति। केतोः प्रभावः प्रायः लौकिकविषयेषु दुःखदः भवति।

**लग्ने कृतघ्नमसुखं पिशुनं विवर्णं**
**स्थानच्युतं विकलदेहमसत्समाजम्।**
**विद्यार्थहीनमधमोक्तियुतं कुदृष्टिं**
**पातः परान्ननिरतं कुरुते धनस्थः॥**[4] २८॥

लग्ने केतुर्स्थाने व्यक्तिः उपकारस्मरणविहीनः, शरीरसुखविहीनः, नीचः, स्थानभ्रष्टः, दुर्जनसमेतश्च भवति। यदि केतुः द्वितीयगृहे भवति तर्हि सः व्यक्तिः ज्ञानधनविहीनः, दुर्वाची, अशुभदृष्टिनेत्रायुक्तः, परकार्येषु तत्परः च भविष्यति।

**आयुर्बलं धनयशा प्रमदान्नसौख्यं**
**केतौ तृतियभवने सहजप्रणाशम्**
**भूक्षेत्रयानजननीसुखजन्मभूमि-**
**नाशं सुखे परगृहस्थितिमेव दत्ते॥**[5] २९॥

यदि केतुः तृतीये गृहे अस्ति तर्हि आयुर्बलयुक्तः, धन-यशः-स्त्री-भोजनसुखयुक्तः च भवन्ति। परन्तु भ्रातृत्वहानिम् अनुभवेत्। यदि केतुः चतुर्थे गृहे अस्ति तर्हि भूमि-भवन-वाहनादीनां नष्टम् अनुभवन् अन्यस्य गृहे वासादि फलम्।

**पुत्रक्षयं जठररोगपिशाचपीडां**
**दुर्बुद्धिमात्मनि खलप्रकृतिं च पातः।**
**औदार्यमुत्तमगुणं दृढतां प्रसिद्धिं**
**षष्ठे प्रभुत्वमरिमदर्नमिष्टसिद्धिम्॥**[6] ३०॥

यदि केतुः पञ्चमे भवति तर्हि पुत्रस्य नाशः, उदररोगः, दुष्टापत्तिः, दुष्टबुद्धिः, दुष्टप्रकृतिश्च फलत्वेन भविष्यति। एवं केतुः षष्ठमे तर्हि दानशीलं, उदात्तगुणाः, दृढनिश्चयः, यशः, शत्रुवृद्धिः चेति परिणामाः भविष्यन्ति।

**द्यूनेऽवमानमसतीरतिमान्त्ररोगं**
**पातः स्वदारवियुतिं मदधातुहानिम्**
**स्वल्पायुरिष्टविरहं कलहं च रन्ध्रे**
**शस्त्रक्षतं सकलकार्यविरोधमेव॥**[7] ३१॥

यदि केतुः ७ गृहे अस्ति तर्हि अपमानं, दुष्टस्त्रीषु रतिः, आन्त्ररोगः, स्वपत्न्या सह असहमतिः च फलानि। यदि केतुः ८ गृहे अस्ति तर्हि तस्य परिणामः अल्पायुः, प्रियजनैः सह कलहः, शस्त्रैः व्रणः, कार्यभङ्गाः च परिणामाः भवन्ति।

**लाभेऽर्थसंचयमनेकगुणं सुभोगं**
**सद्द्व्यसोपकरणं सकलार्थसिद्धिम्।**
**प्रच्छन्नपापमधमव्ययमर्थनाशं**
**रिःफे विरुद्धगतिमक्षिरुजं च पातः॥[8] ३३॥**

यदि केतुः ११ गृहे भवति तर्हि बहुधनं, बहुगुणाः, सुभोगः, बहु गृहसामग्रीणां प्राप्तिः च फलत्वेन भवति। यदि केतुः १२ गृहे भवति तर्हि पापस्य गोपनं, अशुभकार्येषु धनव्ययः, धननष्टः, विपरीतमार्गेण गमनं, नेत्ररोगः च भविष्यन्ति।

ज्योतिषानुगुणं केतुः अध्यात्म-वैराग्य-मोक्ष-गूढविषय-आयुर्वेद-चिकित्सा-तन्त्र-मन्त्र-ज्योतिष-योग-चिकित्सा-विज्ञानादीनां कारण-ग्रहः इति प्रसिद्धः। केतुः पित्तप्रकृतियुक्तः ग्रहः वर्तते। केतुः न केवलं लौकिकविषयेषु अपितु आध्यात्मिकक्षेत्रेषु अपि अनिष्टं प्रददाति। परन्तु कदाचित् केतुः व्यक्तिम् उत्तमम् अन्तर्ज्ञानशक्तिं ददाति। केतोः शुभप्रभावात् गूढजटिलविषयान् सहजतया अवगन्तुं शक्नोति मानवः। तथा च आध्यात्मिकज्ञानं वर्धयितुं शक्नोति। केतुप्रभावेन मनुष्यः चिकित्साकलायां प्रवीणः भवितुम् अर्हति।

**निष्कर्षः**

भारतीयज्योतिशास्त्रानुगुणं राहुकेतवः छायाग्रहौ स्तः। तौ प्रायः मानवजीवने नकारात्मकफलानि प्रयच्छतः। राहुकेतूनामुपरि सामान्यज्ञानं वर्तते यत् तौ द्वौ पापग्रहौ तथा च अस्माकं जीवने दुरनुभवान् कुर्वतः इति। परन्तु तौ द्वौ अपि कदाचित् मानवजीवने सकारात्मकफलान्यपि यच्छतः। यदि राहुः जातके सकारात्मकः अस्ति तर्हि तस्य राजयोगः, आर्थिकलाभः, आविष्कारसफलता, रणनीति-गुणः, विदेशयात्रादीनि फलानि भवन्ति। परन्तु यदि नकारात्मकं भवति तर्हि निराशा भवति फलम्। सकारात्मकचिन्तनं नकारात्मक-दिशायां परिवर्तयति। एवं च अनुकूलकेतुः व्यक्तेः आध्यात्मिकपक्षं वर्धयति इति दृश्यते। जातके बलवान् केतुर्युक्ताः जनाः भौतिकसमृद्धिभ्यः लौकिककामेभ्यः च वैराग्यं अनुभवन्ति। अनुकूलः केतुः अवचेतनायाः उपरि बलं दत्त्वा व्यक्तिषु अन्तर्ज्ञानं मानसिकक्षमतादि आशीर्वादं ददाति। सकारात्मकं केतुस्थानं येषां सन्ति तेषाम् अद्वितीयं रचनात्मकं च कौशलं भवति। सशक्तकेतुर्युक्ताः व्यक्तयः प्रायः समाजपरिवर्तने अत्यन्तं योगदानं कुर्वन्तः इति दृश्यन्ते।

**सन्दर्भग्रन्थसूची**


<u>ग्रन्थाः</u>

फलदीपिका – मन्त्रेश्वरः - देवी बुक् स्टाल् – कोडुङ्ल्लूर् - 2014

फलदीपिका – मन्त्रेश्वरः – चौखम्बा सुरभारती प्रकाशन – वारणासी

बृहज्जातकम् – वराहमिहिराचार्यः – चौखम्बा प्रकाशन् – वारणासी

<u>सन्दर्भजालस्थलानि</u>

https://www.vinaybajrangi.com/blog/rahu/how-rahu-and-ketu-affect-your-life

https://shodhganga.inflibnet.ac.in/handle/10603/388644


**पाद टिप्पणी**

[1] फ.दी 8/25
[2] फ.दी 8/26
[3] फ.दी 8/27
[4] फ.दी 8/28
[5] फ.दी 8/29
[6] फ.दी 8/30
[7] फ.दी 8/31
[8] फ.दी 8/32